इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

आदौ-मुख्यवार्ता:

· प्रधानमन्त्री नरेन्द्रमोदी गुजरातस्य अहमदाबादं संप्राप्य एयर इण्डियाविमानदुर्घटनायां व्रणितैः जनै: सह मिलितवान्, सहएव दुर्घटनास्थलं गत्वा तत्र उद्धारकार्यं कुर्वत्भि: अधिकारिभि: अन्यैः च सह मिलित्वा स्थितेः समीक्षां कृतवान्।

· विमान दुर्घटनायां मृतकानाम शवाः परीक्षणानन्तरं तेषां परिवारेभ्यः समर्पिताः।

· उभयदेशे भारतीयदूतावासने स्वनागरिकाणां कृते सतर्कतां स्थापयितुं परामर्शपत्राणि प्रसारितानि। वर्धमानस्य संघर्षस्य मध्ये षोडश एयर इण्डिया इत्यस्य अन्ताराष्ट्रीयविमानयानानि प्रभावितानि।

· इजराइल- देश: इरानस्य परमाणुस्थानानि, शीर्षसैन्याधिकारिणः च लक्ष्यं कृत्वा वायवीयम् आक्रमणम् कृतवान् ।

भारतऋतुविभागेन उत्तर-पश्चिम क्षेत्रे लू इत्यस्य तापतरङ्गस्य कृते सन्चेतना प्रसारिता।

अथवार्ता: विस्तारेण

प्रधानमंत्री-गुजरात

प्रधानमन्त्री नरेन्द्रमोदी अद्य प्रातः गुजरातराज्यस्य अहमदाबादसिविलचिकित्सालये गत्वा एयर इण्डियाविमानदुर्घटनायां व्रणितैः जनै: सह मिलितवान्। सोशल मीडिया सन्देशे प्रधानमन्त्रिणा उक्तं यत् अहमदाबादस्य विमानदुर्घटनाया: कारणात् सम्पूर्णं राष्ट्रं स्तब्धम् अस्ति। सः शोकग्रस्तपरिवारेभ्यः शोकं प्रकटितवान्। श्री मोदी दुर्घटनास्थलं गत्वा तत्र उद्धारकार्यं कुर्वत्भि: अधिकारिभि: अन्यैः च सह मिलित्वा स्थितेः समीक्षां कृतवान्। अनन्तरं प्रधानमन्त्री अहमदाबाद-नगरे अधिकारिभिः सह समीक्षोपवेशनं कृतवान्। दुर्घटनायां मृतस्य गुजरातस्य पूर्वमुख्यमन्त्री विजयरूपाणी इत्यस्य परिवारजनैः अपि सः मिलितवान् ।

प्रधानमन्त्री चिकित्सालयं गत्वा भारतीयमूलस्य ब्रिटिशनागरिकेण विश्वकुमारेण सह मिलितवान्, यः दुर्घटनायाम् एकः एव जीवितः अस्ति । विश्वासेन प्रधानमन्त्रिणं दुर्घटनासम्बद्धस्य अनुभवस्य विषये उक्तम्, रमेशः प्रसारभारत्याः वार्ताहरेण सह स्वस्य कष्टप्रदम् अनुभवम् उक्तवान्।

श्रीमोदी दुर्घटनास्थलं गत्वा तत्र उद्धारकार्ये संलग्नैः अधिकारिभिः अन्यैः च सह मिलित्वा स्थितेः समीक्षां कृतवान्। दुर्घटनायां मृतकानाम शवाः परीक्षणानन्तरं तेषां परिवारेभ्यः समर्पिताः।

अस्मिन्नेव क्रमे सिविल-चिकित्सालस्य अधीक्षकेण डॉ. राकेश जोशी इत्यनेन उक्तं यत् सम्प्रति द्वात्रिंशत् जनाः चिकित्सालये चिकित्सारताः सन्ति। केषाञ्चन वैद्यान् विहाय ये गम्भीररूपेण व्रणिताः सन्ति, अन्येषां स्थितिः स्थिरा अस्ति । सः अवदत् यत् व्रणितानां शीघ्रं स्वस्थ्याय चिकित्सालये आवश्यकाः सर्वाः व्यवस्थाः कृताः सन्ति।

प्रधानमंत्री - विजय रूपाणी :

अहमदाबादे विमान दुर्घटनायां गुजरातस्य पूर्वमुख्यमन्त्री विजयरूपाणी-वर्यस्य निधने प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य शोकः प्रकटितः। एकस्मिन् सोशल मीडिया संदेशे श्रीमोदी अवदत् यत् सः विजयरूपाणी इत्यनेन सह मिलित्वा कार्यं कृतवान्। यत्र केषुचित् अत्यन्तं समाव्हानपूर्णेषु समयेषु अपि कार्यं कृतवान्। सः रूपाणी वर्यस्य जीवनयात्रां प्रकाशितवान्, राजकोटनगरपालिकायां तस्य कार्याणि, राज्यसभासांसदरूपेण, गुजरातभाजपाध्यक्षत्वेन, राज्यसर्वकारे मन्त्रिमण्डलस्य मन्त्रिरूपेण च कार्यकालेन सह विविधभूमिकासु तस्य योगदानस्य स्मरणं कृतवान्। प्रधानमन्त्रिणा उक्तं यत्, सः विनयशीलः, कर्मठः, दलस्य विचारधारायां दृढतया प्रतिबद्धः च आसीत् ।

जयशंकर- विमानदुर्घटना

एयर इण्डिया विमानदुर्घटनायाः विषये विदेशमन्त्री एस जयशंकरः ब्रिटेन- पुर्तगाल- कनाडादेशैः सह वार्तालापमकरोत्। विदेशमन्त्री एस जयशंकरः अद्य अहमदाबादविमानदुर्घटनायाः विषये ब्रिटेनस्य विदेशसचिवेन डेविड् लैम्मी, पुर्तगालस्य विदेशमन्त्रिणा पौलो रङ्गेलेन, कनाडादेशस्य विदेशमन्त्रिणा अनिता आनन्देन च सह सम्पर्कं कुर्वन् अस्ति । जयशंकरः मृतकानां परिवारेभ्यः शोकं प्रकटितवान्, तेन उक्तं यत् त्रिपञ्चाशत् ब्रिटीश- नागरिकाः सप्त पुर्तगालीयाः एकः कनाडादेशीयः एते विभिन्नराष्ट्राणां नागरिकाः गतदिवसे अहमदाबादनगरे विमानदुर्घटनायां दिवं गताः।

इजराइल-ईरान

इजरायलः इरानस्य परमाणुसंस्थानानि, शीर्षसैन्याधिकारिणः च लक्ष्यं कृत्वा वायवीयं प्रहारं कृतवान् । इजरायल्-देशेन गतरात्रौ इरानस्य परमाणु--क्षेपणास्त्र-कार्यक्रम-सम्बद्धानि स्थानानि, वरिष्ठ-सैन्य-अधिकारिणः च लक्ष्यं कृत्वा गभीर-वायु-आक्रमणानि कृतानि । इजरायलस्य प्रधानमन्त्री बेन्जामिन नेतन्याहू इत्यनेन अस्य आक्रमणस्य नाम ऑपरेशन राइजिंग लायन् इति कृतम्। एतानि आक्रमणानि कतिपय- दिनानि यावत् निरन्तरं भविष्यन्ति इति सः उक्तवान्।

एतस्य कार्यस्य प्रतिक्रियारूपेण इरान्-देशेन अपि इजरायल्-देशोपरि शताधिकानि ड्रोन्-आक्रमणानि कृतानि ।

विरामः

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः www.newsonair.gov.in वेबसाइट इत्यत्र, अथ newsonair मोबाइल एप इत्यत्र अपि उपलब्धो भविष्यति।

परामर्श- इरान-इजरायल

उभयदेशे भारतीयदूतावासेन स्वनागरिकाणां कृते सतर्कतां स्थापयितुं परामर्शपत्राणि प्रसारितानि। भारतेन इरान्-इजरायलयोः मध्ये अद्यतन घटनाविषये चिन्ता प्रकटिता, भारतम् उभयपक्षं आग्रहम् कृतवत् यत् संघर्ष वर्धनस्य किमपि पदं न गृह्णीयात् । भारतेन उभौ देशौ उक्तौ यत् ते तनावं न्यूनीकर्तुम् संवादस्य कूटनीतेश्च मार्गं स्वीकुर्वन्तु

इति। क्षेत्रे सर्वे भारतीयनागरिकाः सावधानाः भूत्वा स्थानीयसुरक्षापरामर्शस्य अनुसरणं कुर्वन्तु इति परामर्शः प्रदत्तः।

एयरइंडिया-फलाइट

वर्धमानस्य संघर्षस्य मध्ये एयर इण्डिया इत्यस्य अन्ताराष्ट्रीयविमानयानानि प्रभावितानि। गतरात्रौ इरान्-देशे इजरायल्-देशस्य प्रबल-आक्रमणस्य अनन्तरं एयर इण्डिया-संस्थायाः अन्तर्राष्ट्रीय-विमानयानानां मार्गं परिवर्त्य कानिचित् विमानयानानि पुनः आहूतानि। एतां सूचनां सामाजिकमाध्यमेषु दत्त्वा एयर इण्डिया इत्यनेन उक्तं यत् परिवर्तमानानां विमानयानानां यात्रिणां कृते वैकल्पिकव्यवस्था क्रियते।

ऋतुविभागः

भारतऋतुविभागेन दिल्ल्यां लू इति तापतरङ्गस्य कृते ऑरेंज-अलर्ट इति संचेतना प्रसारिता। राजस्थाने, पञ्जाबे, हरियाणायां च केषुचित् भागेषु तीव्रतापतरङ्गानाम् रेड-अलर्ट इति सन्चेतना च प्रसारिता। आकाशवाण्या सह चर्चायां ऋतुविभागस्य वरिष्ठवैज्ञानिकः डॉ. आर. के जेनामणी अवदत् यत् आगामिषु त्रीणि- चत्वारि दिवसेषु कोङ्कणे-गोवायां-कर्नाटके-केरले-तमिलनाडु राज्ये च केषुचित् भागेषु अतिवृष्टेः संभावना विद्यते।

।। इति वार्ताः ।।